# २०२१–२२

## शास्त्रीपरीक्षा

## खण्डः- द्वितीयः, अधिसत्रं- द्वितीयम्

## विषयः-संस्कृतम् (‘ख’ वर्गः), पत्रं- सप्तमम्

---

**समयः ३½ होराः** **सम्पूर्णाङ्काः- ७०**

**निर्देशः – एकस्यां पंक्तौ दश शब्दाः प्रतिपृष्ठं च अष्टौ पंक्तयो लेख्याः ।**

**१. केचन अष्टौ प्रश्नाः समाधेयाः। 'क' वर्गतः चत्वारः 'ख' वर्गतः चत्वारः अपेक्ष्यन्ते ।** **१x८=८**

**“क-वर्गः”**

**क.** शिवराजविजयः कस्य रचना?

**ख.** श्यामवटोः अवस्था का?

**ग.** कुटीरस्य दक्षिणतः कः?

**घ.** दिल्लीश्वरः कः?

**ङ.** महाकन्दरः कुत्र आसीत्?

**च.** शिवराजविजये प्रकरणनाम किम्?

**“ख-वर्गः”**

**क.** साहित्यदर्पणे कति परिच्छेदाः?

**ख.** साहित्यदर्पणस्य कर्ता कः?

**ग.** आचार्यविश्वनाथमते रसाः कति?

**घ.** विभावः कतिधा?

**ङ.** वीभत्सस्य स्थायीभाव कः?

**२. 'च' वर्गतः द्वौ छ वर्गतश्च एकः इत्येवं त्रयः प्रश्नाः समाधेयाः- ३x५=१५**

**"च-वर्गः"**

**क.** योगिराजस्य परिचयो देयः।

**ख.** श्यामवटोः परिचयो निरूपणीयः।

**ग.** प्राप्तायाः कन्यायाः परिचयो वर्णनीयः।

**"छ-वर्गः"**

**क.** व्यभिचारिभावस्य परिचयो विलिख्यताम्।

**ख.** उद्दीपनविभावस्य स्वरूपम्।

**३. केचन चत्वारः प्रश्नाः समाधेयाः - ४x५=२०**

**क.** संक्षेपेण शिवराजस्य चरित्रं प्रतिपाद्यताम्।

**ख.** पर्वतखण्डस्य परिचयो देयः।

**ग.** प्रकृतिचित्रणं विलिख्यताम्।

**घ.** नायकस्य लक्षणं प्रतिपाद्यताम्।

**ङ.** गौरवटोः परिचयो देयः।

४. साहित्यदर्पणस्य महत्त्वं प्रतिपाद्यताम्। ७

**अथवा**

विभावेनानुभावेन व्यक्तः संचारिणा तथा।

रसतामेति रत्यादिः स्थायीभावः सचेतसाम्॥

कारिकैषा व्याख्येया॥

**५. कश्चिदेकः गद्यखण्डः ससन्दर्भः व्याख्येयः-** **१०**

**क.** कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका पूर्वतः परम-पवित्र पानीयं परस्सहस्त्र-पुण्डरीक-पटल-परिलसितं पतत्रिकुल-कूजित-पूजितं पयः पूरितं सर आसीत्। दक्षिणतश्चैको निर्झर-झर्झर ध्वनि-ध्वनित-दिगन्तरः फल पटलाऽऽस्वाद चपलित-चञ्चुपतङ्गकुलाऽऽक्रमणाधिकविनतशाख-शाखि-समूह-व्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत्।

**ख.** सत्यं न लक्षितो मया समय-वेगः यौधिष्ठिरे समये कलितसमाधितरहं वैक्रमसमये समाधिमाकलय्य अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि अहं पुनर्गत्वा समाधिमेव कलयिष्यामि किन्तु तावत् सङक्षिप्य कथ्यतां का दशा भारत वर्षस्येति।

**६. द्वे कारिके व्याख्यायेताम् -** **५x२=१०**

**क.** करुणादावपि रसे जायते यत्परं सुखम्।

सचेतसामनुभवः प्रमाणं तत्र केवलम्॥

**ख.** हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्।

शोकहर्षादयो लोके जायन्तां नाम लौकिकाः।।

**ग.** कारण-कार्यसञ्चारिरूपा अपि हि लोकतः।

रसोद्बोधे विभावाद्याः कारणान्येव ते मताः।।

************************************